श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चत्वारिंशः सर्गः ॥

## श्रीरामस्य कृते सीतया पुनः सन्देशस्य दानं तामाश्वास्य हनुमत उत्तरदिशायां प्रस्थानम्

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः।
उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ **5.40.1** ॥

त्वां दृष्ट्वा प्रियवक्तारं सम्प्रहृष्यामि वानर।
अर्धसञ्जातसस्येव वृष्टिं प्राप्य वसुन्धरा ॥ **5.40.2** ॥

यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्शितैः।
संस्पृशेयं सकामाहं तथा कुरु दयां मयि ॥ **5.40.3** ॥

अभिज्ञानं च रामस्य दद्या हरिगणोत्तम।
क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ॥ **5.40.4** ॥

मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः।
त्वया प्रणष्टे तिलके तं किल स्मर्तुमर्हसि ॥ **5.40.5** ॥

स वीर्यवान् कथं सीतां हृतां समनुमन्यसे।
वसन्तीं रक्षसां मध्ये महेन्द्रवरुणोपम ॥ **5.40.6** ॥

एष चूडामणिर्दिव्यो मया सुपरिरक्षितः।
एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ **5.40.7** ॥

एष निर्यातितः श्रीमान् मया ते वारिसम्भवः।
अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ **5.40.8** ॥

असह्यानि च दुःखानि वाचश्च हृदयच्छिदः।
राक्षसैः सह संवासं त्वत्कृते मर्षयाम्यहम्॥ **5.40.9** ॥

धारयिष्यामि मासं तु जीवितं शत्रुसूदन।
मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज॥ **5.40.10** ॥

घोरो राक्षसराजोऽयं दृष्टिश्च न सुखा मयि।
त्वां च श्रुत्वा विषज्जन्तं न जीवेयमपि क्षणम्॥ **5.40.11** ॥

वैदेह्या वचनं श्रुत्वा करुणं साश्रुभाषितम्।
अथाब्रवीन्महातेजा हनूमान् मारुतात्मजः॥ **5.40.12** ॥

त्वच्छोकविमुखो रामो देवि सत्येन ते शपे।
रामे शोकाभिभूते तु लक्ष्मणः परितप्यते॥ **5.40.13** ॥

दृष्टा कथञ्चिद् भवती न कालः परिदेवितुम्।
इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि॥ **5.40.14** ॥

तावुभौ पुरुषव्याघ्रौ राजपुत्रावनिन्दितौ।
त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः॥ **5.40.15** ॥

हत्वा तु समरे रक्षो रावणं सहबान्धवैः।
राघवौ त्वां विशालाक्षि स्वां पुरीं प्रति नेष्यतः॥ **5.40.16** ॥

यत्तु रामो विजानीयादभिज्ञानमनिन्दिते।
प्रीतिसञ्जननं भूयस्तस्य त्वं दातुमर्हसि॥ **5.40.17** ॥

साब्रवीद् दत्तमेवाहो मयाभिज्ञानमुत्तमम्।
एतदेव हि रामस्य दृष्ट्वा यत्नेन भूषणम्॥ **5.40.18** ॥

श्रद्धेयं हनुमन् वाक्यं तव वीर भविष्यति।
स तं मणिवरं गृह्य श्रीमान् प्लवगसत्तमः॥ **5.40.19** ॥

प्रणम्य शिरसा देवीं गमनायोपचक्रमे।
तमुत्पातकृतोत्साहमवेक्ष्य हरियूथपम् ॥ **5.40.20** ॥

वर्धमानं महावेगमुवाच जनकात्मजा।
अश्रुपूर्णमुखी दीना बाष्पगद्गदया गिरा ॥ **5.40.21** ॥

हनूमन् सिंहसङ्काशौ भ्रातरौ रामलक्ष्मणौ।
सुग्रीवं च सहामात्यं सर्वान् ब्रूया अनामयम् ॥ **5.40.22** ॥

यथा च स महाबाहुर्मां तारयति राघवः।
अस्माद् दुःखाम्बुसंरोधात् त्वं समाधातुमर्हसि ॥ **5.40.23** ॥

इदं च तीव्रं मम शोकवेगं
  रक्षोभिरेभिः परिभर्त्सनं च।
ब्रूयास्तु रामस्य गतः समीपं
  शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ **5.40.24** ॥

स राजपुत्र्या प्रतिवेदितार्थः
  कपिः कृतार्थः परिहृष्टचेताः।
तदल्पशेषं प्रसमीक्ष्य कार्यं
  दिशं ह्युदीचीं मनसा जगाम ॥ **5.40.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥